केरलपाठावलिः

# संस्कृतम्

## सप्तमी कक्ष्या

संस्कृतविद्यालयानां कृते

KERALA READER

# SANSKRIT

STANDARD

## VII

FOR SANSKRIT SCHOOLS ONLY

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2024

ST-407-1-SANSKRIT-O/S-7

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जयगाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च। अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

*Prepared by:*
State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883,Typesetting and Layout: SCERT
First Edition: 2024
Printed at : KBPS, Kakkanad, Kochi-30
© Department of General Education, Government of Kerala

प्रियच्छात्राः

सप्तमकक्ष्यायाः संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। आत्मकथा, लघूपन्यासः, काव्यांशः, विवरणम्, लघुनाटकम्, सुभाषितानि इत्यादिभिः व्यवहाररूपैः सम्पुष्टं भवतीदं पाठ्यपुस्तकम्।

राष्ट्रिय-कौशल-योग्यता-प्रारूपम् (NSQF), सूचन-प्रौद्योगिक-उपाधयश्च (ICT) पाठ्यपुस्तकेऽस्मिन् परिगणिताः सन्ति।

स्वतन्त्रवाचनाय, स्वतन्त्रचिन्तायै सर्गवैभवाय च पुस्तकेऽस्मिन् अवसराः समाकलिताः। भाषायाः प्रयोगोपाधिमवगन्तुं तद्वारा रचनाप्रवर्तनेषु भागं ग्रहीतुं च पठनानुभवाः कक्ष्याप्रकोष्ठात् अवाप्तव्याः।

पुस्तकस्यास्य अध्ययनेन संस्कृतस्य विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यतीति आशासे।

भवदीयः

**डा. जयप्रकाश् आर् के**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

# TEXT BOOK DEVELOPMENT TEAM

## Advisor

V. Madhavan Pillai, Associate Professor in Sanskrit (Rtd.)

## Chairperson

Dr. Harinarayanan M. Asso. Professor & HOD, Dept.of Jyothisha, Govt Sanskrit College, Thiruvananthapuram

## Experts

Dr. Devan E.M, Asst. Professor, Govt. Sanskrit College, Thiruvananthapuram

Dr. Jayakrishnan Nampoothiri N.D, Asst. Professor, Govt. Sanskrit College, Thiruvananthapuram

## Participants

Dr. Chithra V S, GHSS, Thrikkodithanam, Kottayam

Leeba K P, St. Johns U P S Kaloor, Ernakulam

Manjumol P M, St. George HS Manimala, Kottayam

Mayadevi K K, SUPS Thottara, Ernakulam

Rajesh C S, GHS, Chottupara, Idukki

Rajesh Kumar P K, St. Mary's H S S Kaliyar, Idukki

Renjith M R, SABTM UPS, Kureeppally, Kollam

Abraham Alex, G H S S Edakkara, Malappuram

## Academic Co-Ordinator

Smt. Sujitha V
Research Officer SCERT, Kerala.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

# विषयानुक्रमणिका


| | एककम् | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| १ | **समयोऽयं पुरो यास्यति** | १. उद्यमः श्रेयान् | आत्मकथा | ७ - १६ |
| | | २. सर्वे सन्तु निरामयाः | लघूपन्यासः | १७ - २६ |
| २ | **प्रकृतिलावण्यम्** | ३. वर्षर्तुवर्णनम् | काव्यांशः | २७ - ३९ |
| | | ४. काननश्रीः | विवरणम् | ४० - ४६ |
| ३ | **स्वास्थ्यं वै धनम्** | ५. सुमनसः | लघुनाटकम् | ४७ - ५७ |
| | | ६. स्वास्थ्यमस्तु | सुभाषितानि | ५८ - ६९ |

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാനിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

प्रथमम् एककम्

# समयोऽयं पुरो यास्यति




## आमुखम्

समयोऽयं पुरो यास्यति इति प्रसिद्धा उद्धरणिः अस्मभ्यं प्रेरणां ददाति। मानवराशेः नितान्तं स्नेहैक्यमेव अस्माकं शक्तिः। ऐक्यभावना यं कमपि प्रतिबन्धं तर्तुम् अस्मान्प्रेरयति। साध्वाचरणेन समस्याः सम्मुखीकर्तुं वयं शक्नुमः।

अस्मिन् एकके द्वौ पाठौ स्तः। प्रथमः डा.अब्दुल्कलां महाशयस्य आत्मकथांशः। द्वितीयस्तु कोविड् १९ महाव्याधिमधिकृत्य कश्चन उपन्यासश्च ।

## प्रथमः पाठः

# उद्यमः श्रेयान्





एतेषां महात्मनां परिचयः अस्ति वा?

तेषां नामानि वदन्तु।

महात्मनां विषये किं किं जानन्ति?

अद्य एकस्य महात्मनः जीवने प्रवृत्तां घटनां पठामः।

### आमुखम्

अस्माकं जीवने कदाचित् नैकाः समस्याः समायान्ति। तदा ताः परिहार्याः वा उत उदासीनताः वा कार्याः? स्वप्रत्ययस्थैर्येण समस्याः परिहृत्य जीवनविजयं प्राप्नुयात्। एवं जितवन्तो महात्मानो बहवः सन्ति। अत्र विख्यातस्य अब्दुल्कलांवर्यस्य आत्मकथांशं पठामः।



भारतस्य दक्षिणकोणे विद्यमानं सुन्दरं द्वीपनगरं भवति रामेश्वरम्। तत्र कस्मिंश्चित् द्राविडपरिवारे जैनुलब्दीन्-आयिषाम्मा-दम्पत्योः पुत्रो भवत्यस्माकं कथानायकः। तस्य बाल्यकालः दारिद्र्यपूर्णः आसीत्। परिवारस्य संरक्षणाय सः दिनपत्रिकाः वितरति स्म। यद्यपि सः अध्ययनवेलायाम् अतिसमर्थः विद्यार्थी नासीत् तथापि प्रयत्नशीलः प्रतिभाशाली चासीत्।

बाल्य एव सः वैमानिको भवितुम् अभिलषति स्म। कालान्तरे सः 'हिन्दुस्थान् एयरोनोट्टिक्स् लिमिट्टड्' इति संस्थायाः 'एयरोनोट्टिक्कल् एन्जिनीयर्' इत्युपाधिं प्राप्तवान्। तदनन्तरं सः व्योमसेनायाः मौखिकपरीक्षायां भागभाक् भवितुं देहराडून् (डेराडूण्) नगरम् अगच्छत्। वाचिकपरीक्षायां सः सुप्रकटनमेव प्रादर्शयत् किन्तु व्योमसेनायाम् अष्टौ जनान् चेतुं चालितायां परीक्षायां सः नवमत्वेन उत्तीर्णः । ततः व्योमसेनायाम् अभिलषितः एषः अवसरोऽपि नष्टोऽभूत्। विषण्णः सः ऋषिकेशं प्रति प्रातिष्ठत। तत्र गङ्गायां स्नात्वा देहशुद्धिमकरोत्। तदनु सः पर्वतोपरि स्थितं शिवानन्दाश्रमं प्राविशत्। तत्र शुभ्रवस्त्रधारिणं बुद्धसदृशं कञ्चन स्वामिनमपश्यत्। आगतस्य चित्तव्यथामवगम्य



स्वामी इत्थमवदत् - "भवान् कश्चन व्योमसेनावैमानिको भवितुं नार्हति। पराजयः विजयस्य सोपानमिति मत्वा इतोऽप्यग्रे गच्छेत्" इति।

स्वामिना प्रचोदितः प्रयत्नशीलः प्रतिभाशाली चायं युवा विषादं विहाय स्वप्रयत्नेन भारतीयानां छात्राणां यूनां प्रचोदकोऽभवत्। असावेव कालान्तरे सर्वानपि लक्ष्यानुसारं स्वप्नं द्रष्टुं प्रेरितवान् भारतस्य भूतपूर्वराष्ट्रपतिः डॉ.ए.पि.जे अब्दुल्कलां महाभागः।

"निद्रायाम् अनुभूयमानाः नैव स्वप्नाः, परन्तु ये निद्राभङ्गाय भवन्ति ते एव स्वप्नाः "।

ए.पि.जे. अब्दुल्कलाम्

**पदच्छेदः**

| | | |
|---|---|---|
| समयोऽयम् | - | समयः + अयम् |
| प्रचोदकोऽभवत् | - | प्रचोदकः + अभवत् |
| भवत्यस्माकम् | - | भवति + अस्माकम् |
| बाल्य एव | - | बाल्ये+ एव |
| चायम् | - | च +अयम् |
| असावेव | - | असौ +एव |
| इत्युपाधिम् | - | इति +उपाधिम् |

**विग्रहः**

| | | |
|---|---|---|
| स्नेहैक्यम् | – | स्नेहेन ऐक्येन च । |
| भूतपूर्वः | - | पूर्वं भूतः । |
| महात्मनः | - | महान् आत्मा यस्य सः , तस्य । |
| दम्पती | - | जाया च पतिः च । |

## पठनप्रवर्तनानि

**पाठभागं पठित्वा नूतनपदानाम् अर्थं शब्दकोशं निरीक्ष्य लिखतु।**

**उदाहरणानुसारं लकारपरिवर्तनं करोतु -**

उदा-

| लट् | लङ् | लृट् |
|---|---|---|
| पठति | अपठत् | पठिष्यति |
| गच्छति | अगच्छत् | ................ |
| ................... | अपश्यत् | द्रक्ष्यति |
| वदति | ..................... | वदिष्यति |
| करोति | अकरोत् | ..................... |
| ....................... | अभवत् | भविष्यति |

**श्रद्धेयाः अंशाः-**

लकारज्ञानम्
पदज्ञानम्
अर्थज्ञानम्

**भारतीयशास्त्रकाराणां सचित्रसम्पुटं (ALBUM) निर्मातु ।**

उदा - सी.वि.रामः , जे.सि.बोस् .................।

## अतिजीवनवार्ताः सञ्चित्य पत्रिकां निर्मातु।

**श्रद्धेयाः अंशाः-**

उचितं शीर्षकम्

आशयव्यक्तता

उचितपदप्रयोगः

## सूचनामनुसृत्य जीवनचरितं लिखतु।

सूचनाः-

| | |
|---|---|
| जननम् | - १९३१ ओक्टोबर् ३ |
| जन्मस्थानम् | - रामेश्वरम् |
| मातापितरौ | - जैनुलब्दीन्, आयिषाम्मा |
| पूर्णनाम | - अवुल् पकीर् जैनुलब्दीन् अब्दुल् कलाम् |
| पदवी | - अध्यापकः, शास्त्रज्ञः, राष्ट्रपतिः। |
| प्रख्यातनाम | - मिसैल् मान्। |
| कृतिः | - अग्निच्चिरकुकल् (आत्मकथा) |
| दिवङ्गतः | - २०१९ जूलै २९ |

**श्रद्धेयाः अंशाः-**

उचितभाषाप्रयोगः

आशयबोधः

वाक्यघटना

## उदाहरणानुसारं वाक्यं परिवर्त्य लिखतु।

**उदा-** •वृष्टिः भवति। उष्णम् अधिकं भवति।

**यद्यपि** वृष्टिः भवति **तथापि** उष्णम् अधिकं भवति।

•सीमा ज्वरेण पीडिता भवति। सा परीक्षां लिखति।

•सागरे प्रभूतं जलमस्ति। पातुं न योग्यं भवति।

•गृहे वाहनम् अस्ति। राजीवः बस्यानेन विद्यालयं गच्छति।

•बहवः केदाराः सन्ति। जनाः कृषिकर्म न कुर्वन्ति।

•सः धनिकः अस्ति। सः दानं न करोति।

### उदाहरणानुसारं यथोचितं योजयतु।




### अमरकोशकारिकां पठित्वा समानार्थकपदानि वर्गीकरोतु।

कालः- कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः।
प्रतिपद्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः ।।
कालः, दिष्टः, समयः (अ.पु.प्र.ए) , अनेहा (स.पु.प्र.ए) पक्षतिः (इ.स्त्री.प्र.ए), प्रतिपत् (त.स्त्री.प्र.ए) , तिथयः (इ.पु.प्र.ए)

स्वप्नः- स्यान्निद्रा स्वपनं स्वापः स्वप्नः संवेश इत्यपि।
निद्रा (आ.स्त्री.प्र.ए) ,स्वपनम् (अ.न.प्र.ए),स्वापः , स्वप्नः, संवेशः (अ.पु.प्र.ए)

| कालः | स्वप्नः |
|---|---|
| | |

## अनुबन्धः

### शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| कदाचित् | कदाचन | ഒരിക്കൽ | Once |
| उत्तीर्णः | जितः | വിജയിച്ചവൻ | Winner |
| परिवारः | कुटुम्बम् | കുടുംബം | Family |
| प्रयत्नशीलः | यत्नशीलः | കഠിനാധ്വാനി | Hard worker |
| प्रवेष्टुं | प्रवेशनं कर्तुम् | പ്രവേശിക്കുവാൻ | To get in |
| वितरति | वितरणं करोति | വിതരണം ചെയ്യുന്നു | Distributes |
| विषण्णः | दुःखितः | ദുഃഖിതൻ | Sad |
| व्यथा | दुःखम् | ദുഃഖം | Sorrow |
| समर्थः | निपुणः | സമർത്ഥൻ | Efficient |
| स्वप्रत्ययस्थैर्येण | आत्मविश्वासेन | ആത്മവിശ്വാസം കൊണ്ട് | With confidence |
| संस्था | समितिः | സംഘടന | Union |

### 'भू' धातुः परस्मैपदी- लङ् (अनद्यतनभूतार्थः)

| | ए . व. | द्वि . व. | ब . व. |
|---|---|---|---|
| प्र.पु | अभवत् | अभवताम् | अभवन् |
| म.पु | अभवः | अभवतम् | अभवत |
| उ.पु | अभवम् | अभवाव | अभवाम |

**दकारान्तः अस्मद् शब्दः त्रिषु लिङ्गेषु समानरूपः**

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| प्र. | अहम् | आवाम् | वयम् |
| द्वि. | माम्/मा | आवाम्/नौ | अस्मान्/नः |
| तृ. | मया | आवाभ्याम् | अस्माभिः |
| च. | मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| प. | मत् | आवाभ्याम् | अस्मत् |
| ष. | मम /मे | आवयोः/नौ | अस्माकम्/नः |
| स. | मयि | आवयोः | अस्मासु । |

**अधिकव्याकरणांशः**

उपसर्गयुक्तधातूनां लङ्लकारप्रयोगे विशेषता अस्ति। लङ्-लकारस्य अडागमः उपसर्गानन्तरं धातोः पूर्वम् एव भवति।

उदा- विशति - अविशत्
उपविशति - उप +अविशत् - उपाविशत्
गच्छति - अगच्छत्
आगच्छति - आ +अगच्छत् - आगच्छत्

**व्याकरणविशेषः**

स्म शब्दयोगे भूतकालार्थः

वर्तमानकालक्रियापदेन सह स्म शब्दप्रयोगे भूतकालार्थः सिध्यति।

उदा - पठति स्म - अपठत्
गच्छति स्म - अगच्छत्
वितरति स्म - व्यतरत्

## अधिगताः अंशाः

- पाठभागं पठित्वा नूतनपदानाम्  अर्थं शब्दकोशं निरीक्ष्य अलिखत् ।
- उदाहरणानुसारं लकारपरिवर्तनम् अकरोत् ।
- भारतीयशास्त्रकाराणां सचित्रसम्पुटं  (ALBUM) निर्मितम् ।
- अतिजीवनवार्ताः सञ्चित्य पत्रिकाम् अलिखत्।
- सूचनामनुसृत्य जीवनचरितम् अलिखत्।
- उदाहरणानुसारं वाक्यं परिवर्त्य अलिखत्।
- यथोचितम् अयोजयत् ।
- समानार्थकपदानि वर्गीकृतानि।

विविधशास्त्रविभागेषु पुरोगतिम् अधिकृत्य चर्चां करोतु ।

खगोलशास्त्रम्

आधुनिकसाङ्केतिकविज्ञानम्

कार्षिकविज्ञानम्

वैद्यशास्त्रम्।

## द्वितीयः पाठः

# सर्वे सन्तु निरामयाः



चित्रमिदं कस्याः ?

चित्रे विशेषतया किं पश्यति ?

कारणं किम् ?

### आमुखम्

प्रियच्छात्राः, इदानीं वयं विद्यालयमागत्य सन्तोषेण पठितुं शक्नुमः। पूर्वं का समस्या जाता इति वयं जानीमः। अस्माकमध्ययनं सर्वमपि अन्तर्जालद्वारा आसीत्। कारणं किमिति चिन्तयन्तु।



चीनायाः वुहान् देशात् २०१९ (नवदशाधिकद्विसहस्रं) तमे वर्षे प्रसृता महामारिः भवति कोविड् १९। अस्याः महामार्याः हेतुः कोरोणा नाम रोगाणुरासीत्।आशु सा महामारिराविश्वं व्याप्ता अभवत्। तया लक्षशः जनाः मृतवन्तः। दुरवस्थेयमस्माभिः अनुभूता च। एकान्तवासः, मुखावरणम् ,वारं वारं हस्तप्रक्षालनम् , इत्यादीन् प्रतिरोधमार्गान् स्वीकर्तुं सर्वकाराः अस्मान् आदिशन्। या पीडाः विविधेषु देशेषु सहसा व्याप्य बहून् जनान् मारयति सा महामारिरिति कथ्यते। प्रायः ईदृश्यः महामारयः सर्वाः अपि जन्तुभ्यः मनुष्येषु सङ्क्रमन्ते। निपा, एबोला, प्लेग् इत्यादयः जन्तुजन्याः रोगाः भवन्ति। ब्रोङ्कैट्टिस् रोगबाधितेभ्यः पक्षिभ्यः प्रथमतया १९३७ (सप्तत्रिंशत्यधिकनवशतोत्तरैकसहस्रं) तमे वर्षे कोरोणारोगाणुः प्रत्यभिज्ञातः। मूषकाः, कुक्कुटाः, मार्जाराः, गावः, अश्वाः इत्यादयो जन्तवोऽपि रोगाणुवाहकाः इति शास्त्रलोकः शङ्कते।

कोविड् १९ इति रोगेण मानवराशेरचिन्त्यो नाशः सञ्जातः। कर्मकराः स्वोद्योगात् तिरस्कृताः। बहूनि वाणिज्यानि अवरुद्धानि। समस्तस्यापि लोकस्य सम्पद्व्यवस्था भग्ना अभवत्। चलच्चित्रशालाः ग्रन्थशालाश्च पिहिताः। अध्ययनं केवलमन्तर्जालद्वारैव प्रचलितम्। क्रीडाङ्कणानि विजनानि अवर्तन्त। देवालयेषु भक्तजनाः विरलाः समभवन्। जनानाम् एतावत्पर्यन्तम् अनुवर्तिता जीवनरीतिः झटित्येव परिवर्तिता।

पूर्वं कार्यभारात् कुटुम्बेन साकं कालं यापयितुम् असमर्थाः जनाः अपि कालेऽस्मिन् सकुटुम्बमावसन् । उद्यानशाकोद्याननिर्माणेषु पाककार्येषु च सर्वे सपरिवारं व्यापृताः। संक्षेपतः तस्मिन् काले परिस्थितिमनुसृत्य वयं परिवर्तिताः।



भूमौ जीवराशेः उत्पत्तेरारभ्य प्रकृतिदुरन्ताः, महामारयः, युद्धाः इत्यादीन् बहून् प्रतिबन्धान् सर्वे जीवजालाः अभिमुखीकुर्वन्ति । भाविकाले कीदृश्यः दुरवस्थाः भविष्यन्ति इति वक्तुं

न शक्नुमः। ताः शास्त्रीयमार्गैः, युक्तिचिन्तनैः, जीवितचर्याभिश्च ऐक्येन तरितुं मानवाः समर्थाः भवेयुः।

**पदच्छेदः**

| | | |
|---|---|---|
| महामारिराविश्वम् | - | महामारिः+ आविश्वम् |
| जन्तवोऽपि | - | जन्तवः +अपि |
| कालेऽस्मिन् | - | काले + अस्मिन् |
| अन्तर्जालद्वारैव | - | अन्तर्जालद्वारा+ एव |
| वदन्तोऽपि | - | वदन्तः+ अपि |
| समूहस्यैकस्य | - | समूहस्य+ एकस्य |
| उत्पत्तेरारभ्य | - | उत्पत्तेः+ आरभ्य |
| दुरवस्थेयमस्माभिः | - | दुरवस्था +इयम्+अस्माभिः |
| रोगाणुरासीत् | - | रोगाणुः+आसीत् |

**विग्रहः**

| | | |
|---|---|---|
| आविश्वम् | - | विश्वं समन्तात् । |
| दुरवस्था | - | दुष्टा अवस्था । |
| मुखावरणम् | - | मुखस्य आवरणम् । |
| सकुटुम्बम् | - | कुटुम्बेन सह । |
| प्रकृतिदुरन्तः | - | प्रकृत्यां जायमानः दुरन्तः । |

## पठनप्रवर्तनानि

### नूतनपदानाम् अर्थं शब्दकोशं निरीक्ष्य लिखतु

अवरुद्धम् - ..........................

पिहिताः - ..........................

प्रसृता - ..........................

झटिति - ..........................

परिवारः - ..........................

**श्रद्धेयौ अंशौ -**

अर्थज्ञानम्

पदज्ञानम्

### पाठभागं पठित्वा प्रश्नान्, तेषाम् उत्तराणि च लिखतु।

उदा- का नाम महामारिः?

या पीडा विविधेषु देशेषु सहसा व्याप्य बहून् जनान् मारयति सा महामारिः।

कोविड् महामारिः कस्मात् देशात् प्रसृता ?

..................................................................?

..................................................................?

**श्रद्धेयाः अंशाः-**

उचितभाषाप्रयोगः

विषयबन्धः

आशयावबोधः

**चित्राणि दृष्ट्वा कोष्ठकात् समुचितां पादटिप्पणीं चित्वा लिखतु।**

(मुखावरणं धरतु, दूरं पालयतु, हस्तप्रक्षालनं करोतु, मलिनजले क्रीडां न कुर्यात् , पक्षिभुक्तावशिष्टानि फलानि मा खादतु)











**श्रद्धेयौ अंशौ -**

उचितक्रमीकरणम्

आशयावबोधः

**साङ्क्रमिकरोगाणां प्रतिरोधसूचिकाः भित्तिपत्रिकाः रचयतु।**

**श्रद्धेयाः अंशाः-**

विषयबन्धः

संक्षिप्तता

आकर्षकत्वम्

चित्रं दृष्ट्वा कोष्ठकात् समुचितं पदं स्वीकृत्य वाक्यानि (लृट् लकारमुपयुज्य) लिखतु।




**( खादिष्यसि, पठिष्यामि, गमिष्यति, भविष्यति, वसिष्यामः )**

उदा- अद्य वृष्टिः भवति।

श्वः वृष्टिः न भविष्यति।

जूण् मासे पिता विदेशं गच्छति।

जूलै मासे पिता विदेशं न ..............।

अद्य अहं संस्कृतं पठामि।

श्वः आङ्गलेयं ...............।

इदानीं वयं तिरुवनन्तपुरे वसामः।

आगामिनि मासे वयं एरणाकुले ..............।

अद्य त्वम् ओदनं खादसि।

त्वं श्वः चित्रान्नं ..............।

**अमरकोशकारिकां पठित्वा समानार्थकपदानि चित्रे लिखतु।**

**अमरकोशः**

रोगः - स्त्री रुग्रुजा चोपतापरोगव्याधिगदाऽमयाः ।

व्याख्यानम्- रुक् (ज. स्त्री), रुजा (आ. स्त्री), उपतापः रोगः(अ.पु), व्याधिः(इ.पुं), गदः ,आमयः (अ.पुं) ।

मनुष्यः- मनुष्याः मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषा पूरुषा नरः ।।

मनुष्याः, मानुषाः, मर्त्याः, मनुजाः, मानवाः, नराः, पञ्चजनाः, पुरुषाः, पूरुषाः (अ.पुं.प्र.ब), पुमांसः (स.पुं) , नरः( स.पुं.प्र.ब)







**श्रद्धेयौ अंशौ-**

आशयग्रहणम्

उचितक्रमीकरणम्

## संख्याः अक्षरैः लिखतु

उदा- २००९ - नवाधिकद्विसहस्रम्।

१९३७ - सप्तत्रिंशदधिकनवशतोत्तरैकसहस्रम्।

१८४७ - ..............................................

१६२३ - ..............................................

१५९५ - ..............................................

१७६४ - ..............................................

१२३३ - ..............................................

**श्रद्धेयौ अंशौ -**

संख्याज्ञानम्

अक्षरशुद्धिः

## पाठभागात् अव्ययपदानि चित्वा पट्टिकां पूरयतु।

| ल्यबन्तः | तुमुन्नन्तः | केवलाव्ययानि |
|---|---|---|
| | | |

**श्रद्धेयौ अंशौ -**

अव्ययज्ञानम्

उचितं क्रमीकरणम्

## अनुबन्धः

### शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| समस्या | प्रतिबन्धः | തടസ്സം | Hindrance |
| प्रसृता | व्याप्ता | വ്യാപിച്ച | Spread |
| हेतुः | कारणम् | കാരണം | Reason |
| झटिति | आशु | പെട്ടെന്ന് | Suddenly |
| आविश्वम् | लोके सर्वत्र | ലോകം മുഴുവൻ | All over the World |
| अवरुद्धम् | प्रतिबद्धम् | തടസ്സപ്പെട്ട | Obstructed |
| पिहिताः | बन्धिताः | അടയ്ക്കപ്പെട്ടവ | Closed |
| परिवर्तितः | अन्यथा कृतः | മാറ്റപ്പെട്ട | Transformed |
| सहसा | आशु | പെട്ടെന്ന് | Suddenly |
| परिवारः | कुटुम्बम् | കുടുംബം | Family |

### शक्लृ शक्तौ धातुः परस्मैपदी लट्

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | शक्नोति | शक्नुतः | शक्नुवन्ति |
| म.पु. | शक्नोषि | शक्नुथः | शक्नुथ |
| उ.पु. | शक्नोमि | शक्नुवः | शक्नुमः। |

### भू धातुः परस्मैपदी विधिलिङ्

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | भवेत् | भवेताम् | भवेयुः |
| म.पु. | भवेः | भवेतम् | भवेत |
| उ.पु. | भवेयम् | भवेव | भवेम। |

ST-407-4-SANSKRIT-O/S-7



**सूचनानुसारं महामारिं प्रकृतिक्षोभान् चाधिकृत्य सङ्गोष्ठिं प्रचालयतु ।**



**प्रकृतिक्षोभविषयकाणां वार्ताः सञ्चित्य चित्रभूमिकां निर्मातु ।**

## अधिगताः अंशाः

- नूतनपदानाम् अर्थं शब्दकोशं निरीक्ष्य अलिखत् ।
- पाठभागस्य आशयं अवदत् अलिखित् च ।
- पादटिप्पणीम् अलिखत् ।
- भित्तिपत्रिकाम् अरचयत् ।
- लट्लकारमुपयुज्य वाक्यानि अलिखत् ।
- समानार्थकपदानि वर्गीकृत्य अलिखत् ।
- संख्याः अक्षरैः अलिखत्।
- अव्ययपदानि वर्गीकृत्य अलिखत् ।

**अधोदत्तं सुभाषितं पठित्वा चर्चां करोतु।**

काले वर्षतु पर्जन्यः
पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितः
सज्जनाःसन्तु निर्भयाः।।

द्वितीयम् एककम्

# प्रकृतिलावण्यम्



## आमुखम्

प्रकृतिः न केवलं मानवानां किन्तु सर्वचराचराणां माता भवति। प्रकृतिम् अनाश्रित्य जीवसन्धारणं दुष्करमेव। प्रकृतेः सौन्दर्यं सर्वान् तोषयति। मनसि सद्भावनां प्रज्वालयितुं प्रकृतिः प्रेरयति। प्रकृत्यनुकूलजीवनेन सर्वे स्वस्थाः निरामयाः च भवन्ति।

## तृतीयः पाठः

# वर्षर्तुवर्णनम्



अस्मिन् चित्रे किं किं पश्यन्ति ?
वर्षाकाले प्रकृतिः कथं परिवर्तते इति अवलोकितवन्तो वा ?
वर्षाकालमधिकृत्य भवद्भिः ज्ञाताः कविताः आलपन्तु ।
वर्षर्तुवर्णनपरान् कांश्चित् श्लोकान् पठामः ।

### आमुखम्

आदिकाव्यं भवति रामायणम्। अस्य कर्ता वाल्मीकिः आदिकविः इति विख्यातः। अस्मिन् काव्ये सप्तकाण्डानि, चतुर्विंशतिसहस्रं श्लोकाः च सन्ति। प्रकृत्याराधकः वाल्मीकिः सर्वान् ऋतून् वर्णयति। किष्किन्धाकाण्डात् स्वीकृतान् वर्षकालवर्णनपरान् कांश्चन श्लोकान् पठामः। प्रस्रवणपर्वते तिष्ठन् रामः लक्ष्मणं प्रति एवं वदति-

१ अयं स कालःसम्प्राप्तः
समयोऽद्य जलागमः।
संपश्य त्वं नभो मेघैः
संवृतं गिरिसन्निभैः।।



**पदच्छेदः**

| | | |
|---|---|---|
| समयोऽद्य | - | समयः+ अद्य |
| नभो मेघैः | - | नभः + मेघैः |

| **अन्वयः** | **अर्थः** |
|---|---|
| अयं सः कालः | सः प्रसिद्धः कालः |
| सम्प्राप्तः | समागतः |
| अद्य | अधुना |
| जलागमसमयः | वर्षाकालः |
| त्वम् | त्वम् / भवान् (लक्ष्मणः) |
| गिरिसन्निभैः | पर्वततुल्यैः |
| मेघैः | घनैः |
| संवृतम् | आवृतम् (भवति) |
| नभः | आकाशम् |
| संपश्य! | सम्यक् पश्य! |

**सारांशः**

हे लक्ष्मण ! सः वर्षाकालः अधुना समागतः। इदानीमेव वृष्टिः भवेत् । पर्वततुल्यैः मेघैः आवृतम् आकाशं त्वं पश्य।

**विग्रहः**

| | | |
|---|---|---|
| गिरिसन्निभैः | - | गिरेः सन्निभः गिरिसन्निभः (तैः ) गिरिसन्निभैः। |
| जलागमः | - | जलस्य आगमः । |

## अमरकोशः

### गिरिपर्यायः (शैलवर्गे)

महीध्रे शिखरीक्ष्माभृदाहर्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ।।

महीध्रः, आहर्यः, धरः, पर्वतः, गोत्रः, अचलः, शैलः, शिलोच्चयः (अ.पुं. प्र.ए.व.) । शिखरी, ग्रावा (न.पुं.प्र.ए.व.) । क्ष्माभृत् (त.पुं.प्र.ए.व.)। अद्रिः, गिरिः (इ.पुं. प्र.ए.व)

संपश्य - सम् उपसर्गपूर्वक दृश् धातोः लोट् म. पु. ए.व

२ शक्यमम्बरमारुह्य
मेघसोपानपङ्क्तिभिः।
कुटजार्जुनमालाभि-
रलङ्कर्तुं दिवाकरम्।।



### पदच्छेदः

कुटजार्जुनमालाभिरलङ्कर्तुम् - कुटजार्जुनमालाभिः+ अलङ्कर्तुम्

| **अन्वयः** | **अर्थः** |
|---|---|
| मेघसोपानपङ्क्तिभिः | सोपानरूपैः मेघश्रेणिभिः |
| अम्बरम् | आकाशम् |
| आरुह्य | आरोहणं कृत्वा |
| कुटजार्जुनमालाभिः | कुटजपुष्पैः अर्जुनपुष्पैः च निर्मिताभिः मालाभिः |
| दिवाकरम् | सूर्यम् |

| | |
|---|---|
| अलङ्कर्तुम् | विभूषयितुम् |
| शक्यम् | साध्यम् (तादृशम् नभःसंपश्य)। |

**सारांशः**

हे लक्ष्मण ! त्वं नभः पश्य ! मेघरूपैः सोपानश्रेणिभिः आकाशम् आरुह्य कुटजपुष्पैः अर्जुनपुष्पैः च निर्मिताभिः मालाभिः सूर्यं विभूषयितुम् साध्यम्।

**विग्रहः**

कुटजार्जुनमालाभिः - कुटजश्च अर्जुनश्च कुटजार्जुनौ, तयोः माला कुटजार्जुनमाला, ताभिः।

**व्याकरणकार्यम्**

| | |
|---|---|
| अलङ्कर्तुम् | - अलं +कृञ् +तुमुन् |
| आरुह्य | - आङ् +रुह् +ल्यप् |

३ मेघोदरविनिर्मुक्ताः
कल्हारसुखशीतलाः।
शक्यमञ्जलिभिः पातुं
वाताः केतकगन्धिनः।।



**पदच्छेदः**

शक्यमञ्जलिभिः - शक्यम् +अञ्जलिभिः

| **अन्वयः** | **अर्थः** |
|---|---|
| मेघोदरविनिर्मुक्ताः | मेघात् बहिरागताः |
| कल्हारसुखशीतलाः | कल्हारदलवत् सौख्यशैत्ययुक्ताः |
| केतकगन्धिनः वाताः | केतकपुष्पाणां सुगन्धेन युक्ताः पवनाः |

| | |
|---|---|
| अञ्जलिभिः | पाणिसम्पुटैः |
| पातुम् | पानं कर्तुम् (आस्वदितुम्) |
| शक्यम् | साध्यम् (नभः पश्य)। |

## सारांशः

हे लक्ष्मण ! त्वं नभः पश्य ! मेघान्तर्भागत् आगताः कल्हारदलवत् सौख्यशैत्ययुक्ताः, केतकपुष्पाणां सुगन्धयुक्ताः पवनाः अञ्जलिभिः आदाय पातुं शक्याः भवन्ति।

## विग्रहः

| | | |
|---|---|---|
| केतकगन्धिनः | - | केतकस्य गन्धः इव गन्धः येषां ते । |
| मेघोदरविनिर्मुक्ताः | - | मेघस्य उदरं मेघोदरम्, तस्मात् विनिर्मुक्ताः मेघोदरविनिर्मुक्ताः। |

## व्याकरणकार्यम्

पातुम्- पा (पाने) तुमुन्नन्तम्।

## अमरकोशः - मेघः

अभ्रं मेघो वारिवाहः स्तनयित्नुर्वलाहकः

धराधरो जलधरस्तटित्वान् वारिदोऽम्बुभृत्।

मेघः, वारिवाहः, वलाहकः, धराधरः, जलधरः, वारिदः - अ.पु.प्र.ए.व., अभ्रम् - अ.न.प्र.ए.व., स्तनयित्नुः - उ.पु.प्र.ए.व., तटित्वान् ,अम्बुभृत् - त.पु. प्र.ए.व.।

४ क्वचित्प्रकाशं क्वचिदप्रकाशं
नभः प्रकीर्णाम्बुधरं विभाति।
क्वचित्क्वचित्पर्वतसन्निरुद्धं
रूपं यथा शान्तमहार्णवस्य।।



| **अन्वयः** | **अर्थः** |
|---|---|
| क्वचित् | कुत्रचित् |
| प्रकाशम् | सुव्यक्तम् |
| क्वचिदप्रकाशं | अन्यत्र अव्यक्तम् |
| क्वचित् क्वचित् | इतस्ततः |
| पर्वतसन्निरुद्धम् | पर्वतैः प्रतिबद्धम् |
| प्रकीर्णाम्बुधरम् | विक्षिप्तमेघयुक्तम् |
| नभः | आकाशम् |
| शान्तमहार्णवस्य रूपं यथा | शान्तसमुद्रस्य आकारः इव |
| विभाति | परिलसति। |

## सारांशः

विकीर्णमेघसहितम् आकाशं कुत्रचित् प्रकाशसहितं कुत्रचित् प्रकाशरहितं च शोभते। तथा तत्र तत्र पर्वतशिखरैः प्रतिबद्धं दृश्यं च आकाशं शान्तमहासमुद्रस्य स्वरूपं यथा तथा प्रशोभते। (इवार्थे 'यथा' इति शब्दः। अतः अत्र उपमालङ्कारः)

## विग्रहः

प्रकीर्णाम्बुधरम् - प्रकीर्णाः अम्बुधराः यस्मिन् तत् प्रकीर्णाम्बुधरम्।

पर्वतसन्निरुद्धम् - पर्वतैः सन्निरुद्धम्।

## क्रियापदम्

विभाति - वि उपसर्गपूर्वक “भा” दीप्तौ लट् प्र.पु.ए.व.।

## अमरकोशः

व्योमवर्गः - द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्।

व्याख्यानम् - द्यौः (ओ.स्त्री.) दिव् (व.स्त्री.) अभ्रम् (अ.न.) व्योम (न.न.) पुष्करम्, अम्बरम् (अ.न.) नभः (स.न.) अन्तरिक्षं, गगनं, अनन्तम् , खम् (अ.न.) सुरवर्त्म , (न.न.) इत्यादीनि आकाशस्य पर्यायपदानि।

५. व्यामिश्रितं सर्जकदम्बपुष्पै-
नवं जलं पर्वतधातुताम्रम् ।
मयूरकेकाभिरनुप्रयातं
शैलापगाः शीघ्रतरं वहन्ति ।।



## पदच्छेदः

मयूरकेकाभिरनुप्रयातम् - मयूरकेकाभिः + अनुप्रयातम्

| अन्वयः | अर्थः |
|---|---|
| शैलापगाः | पर्वतनद्यः |
| सर्जकदम्बपुष्पैः | सर्जपुष्पैः कदम्बपुष्पैः च |
| व्यामिश्रितम् | विशेषेण समग्रतया मिश्रितम् |
| पर्वतधातुताम्रम् | गिरिधातुभिः ताम्रवर्णयुक्तम् |
| मयूरकेकाभिः | मयूराणां केकानादैः |
| अनुप्रयातम् (च) | अनुगतम् (च) |
| नवं जलम् | नूतनं जलम् |
| शीघ्रतरम् | अतिशीघ्रम् |
| वहन्ति | प्रवहन्ति। |

## सारांशः

सर्जपुष्पैः कदम्बकुसुमैः च विशेषेण समग्रतया मिश्रितं , गिरिधातुभिः ताम्रवर्णयुक्तं, मयूराणां केकानादैः अनुगम्यमानं च नूतनं जलं धृत्वा पर्वतसरितः अतिशीघ्रं यान्ति ।

## पठनप्रवर्तनानि



### श्लोकान् समीचीनया रीत्या आलपतु ।

**श्रद्धेयाः अंशाः -**

उचितः तालः
अक्षरस्फुटता
आशयावबोधः



### श्लोकानाम् अन्वयं लिखतु

**श्रद्धेयौ अंशौ**

आशयावबोधः
उचितपदविन्यासः



### प्रकृतिसौन्दर्यम् अधिकृत्य टिप्पणीं लिखतु।

**श्रद्धेयाः अंशाः**

उचितं शीर्षकम्
लेखनशैलिः
वाक्यघटना

### प्रकृतिसौन्दर्यमधिकृत्य नूतनकविताः रचयतु।



**श्रद्धेयाः अंशाः**

आशयव्यक्तता
रचनापाटवम्
लेखनसामर्थ्यम्

## अधोदत्तानि पदानि उपयुज्य वाक्यानि लिखतु।

(संपश्य, अद्य, आरुह्य, अलङ्कर्तुम्, वहन्ति, क्वचित् )

## अमरकोशकारिकाः पठित्वा समानार्थकपदानां पट्टिकां पूरयतु ।

| नभः | जलम् | मेघः |
|---|---|---|
| | | |

**अनुबन्धः**

### शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| सम्प्राप्तः | समागतः | എത്തിച്ചേർന്ന | Arrived |
| जलागमसमयः | वर्षाकालः | മഴക്കാലം | Rainy season |
| अम्बरम् | आकाशम् | ആകാശം | Sky |
| शक्यम् | साध्यम् | കഴിയുന്നത് | Possible |
| अञ्जलिभिः | पाणिसम्पुटैः | കൈക്കുമ്പിളുകളാൽ | With streched out palms |
| प्रकीर्णाम्बुधरम् | विशीर्णमेघयुक्तम् | ചിതറിയ മേഘത്തോടുകൂടിയ | With scattered cloud |
| क्वचित् | कुत्रचित् | ചിലയിടത്ത് | Somewhere |
| प्रकाशम् | सुव्यक्तम् | തെളിവാർന്ന | Clear |
| विभाति | प्रकाशते | തിളങ്ങുന്നു | Shines |
| शैलापगाः | पर्वतनद्यः | പർവ്വതനദികൾ | Mountain rivers |
| सर्जकदम्बपुष्पैः | सर्जपुष्पैः कदम्बपुष्पैः च | ഉങ്ങിൻപ്പൂക്കളാലും കടമ്പിൻപ്പൂക്കളാലും | With flowers of trees called Sarja and Kadamba |
| अनुप्रयातम् | अनुगम्यमानम् | പിന്തുടരപ്പെടുന്ന | Being followed by |

# उपसर्गाः

उपसर्गाः क्रियायोगे - उपसर्गेण धात्वर्थो बलादन्यत्र नीयते
नीहाराहारसंहारविहारपरिहारवत् ।।

प्रविपरापसमन्वनिर्निसो
दुरति दुष्प्रति सूद्धि पर्यति ।
तदनु चाङभिनी उपविंशति
द्विसहितेत्युपसर्गसमाह्वया ।।

| | | |
|---|---|---|
| प्र | पर | अप |
| सम् | अनु | अव |
| निस् | निर् | दुस् |
| दुर् | वि | आङ् |
| नि | अधि | अपि |
| अति | सु | उद् |
| अभि | प्रति | परि |
| उप | | |

इत्यादयः द्वाविंशति उपसर्गाः वर्तन्ते।

| | | |
|---|---|---|
| प्र - प्रविशति | पर - पराजयति | अप - अपहरति |
| सम् - संहरति | अनु - अनुसरति | अव - अवतिष्ठति |
| निस् - निस्सरति | निर् - निर्दिशति | दुस् - दुस्सरति |
| दुर् - दुर्गच्छति | वि - विहरति | आङ् - आगच्छति |
| नि - निवसति | अधि - अधितिष्ठति | अपि - अपिप्रैति |
| अति - अतिजीवति | सु - सुवदति | उत् - उद्गच्छति |
| अभि - अभिनयति | प्रति - प्रतिगच्छति | परि - परिहरति |
| उप - उपविशति | | |

### सकारान्तः नपुंसकलिङ्गः नभस् शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| प्र. | नभः | नभसी | नभांसि |
| सं. | हे नभ | हे नभसी | हे नभांसि |
| द्वि. | नभः | नभसी | नभांसि |
| तृ. | नभसा | नभोभ्यां | नभोभिः |
| च. | नभसे | नभोभ्यां | नभोभ्यः |
| प. | नभसः | नभोभ्यां | नभोभ्यः |
| ष. | नभसः | नभसोः | नभसाम् |
| स. | नभसि | नभसोः | नभस्सु । |

एवमेव मनः, सरः, पयः, वयः इत्यादयः शब्दाः।

### इकारान्तः स्त्रीलिङ्गः भूमिशब्दः

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र. | भूमिः | भूमी | भूमयः |
| सं | हे भूमे | हे भूमी | हे भूमयः |
| द्वि. | भूमिम् | भूमी | भूमीः |
| तृ. | भूम्या | भूमिभ्यां | भूमिभिः |
| च. | भूम्यै/भूमये | भूमिभ्यां | भूमिभ्यः |
| प. | भूमेः/भूम्याः | भूमिभ्यां | भूमिभ्यः |
| ष. | भूमेः/भूम्याः | भूम्योः | भूमीनाम् |
| स. | भूम्याम्/भूमौ | भूम्योः | भूमिषु |

एवमेव निधि-तिथि-प्रीति-प्रभृतयः शब्दाः।

**दृशिर् प्रेक्षणे इति धातुः, परस्मैपदी लोट् रूपाणि ।**

| | ए .व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | पश्यतु/पश्यातात् | पश्यताम् | पश्यन्तु |
| म.पु. | पश्य/पश्यतात् | पश्यतम् | पश्यत |
| उ.पु. | पश्यानि | पश्याव | पश्याम |

## अधिगताः अंशाः

- श्लोकान् समीचीनतया आलपत्।
- श्लोकानाम् अन्वयम् अलिखत् ।
- प्रकृतिसौन्दर्यम् अधिकृत्य टिप्पणीम् अलिखत्।
- प्रकृतिसौन्दर्यमधिकृत्य नूतनकविताः अरचयत्।
- अधोदत्तानि अव्ययानि लकारान् च उपयुज्य वाक्यानि अलिखत्।
- अमरकोशकारिकां पठित्वा समानार्थकपदानां पट्टिकाम् अपूरयत्।

**वृक्षाणां चित्राणि सञ्चित्य सम्पुटं निर्मातु।**

| | | |
|---|---|---|
| सर्जम् | - | വേങ്ങാപ്പൂവ് |
| कुटजम् | - | കുടകപ്പാലപ്പൂവ് |
| अर्जुनम् | - | നീർമരുത്പൂവ് |
| कल्हारम् | - | ചെങ്ങഴിന്നീർപൂവ് |

# चतुर्थः पाठः

# काननश्रीः

भवन्तः नित्यं प्रकृतिं पश्यन्ति किल ! प्रकृत्यां किं किं भवन्ति?
आकाशः, समुद्रः, पशुपक्षिणः, वृक्षाः, वनम्......
वनमधिकृत्य भवन्तः किं किं जानन्ति?
वने किं किं सन्ति? अद्य वनमधिकृत्य कञ्चित् पाठं पठामः।

## आमुखम्

वनं जीवजालानां तथा वृक्षलतादीनां च आवासस्थानं भवति। वनमाश्रित्यैव मानवाः, पशुपक्षिणः, वृक्षलतादयश्च स्वजीवनं यापयन्ति। काननमनोहारिता अस्माकं मनांसि आकर्षति। वनस्य तथा वनविभवानां संरक्षणम् अस्माभिः कर्तव्यमेव। वनसौन्दर्यमधिकृत्य पठामः।



परिस्थितिसमितेः त्रिदिनात्मिका शिल्पशाला पेरियार् व्याघ्रसंरक्षणकेन्द्रे प्रवृत्ता। प्रातः सप्तवादने वयं पेरियार् संप्राप्य काननस्य अलौकिकं सौन्दर्यं द्रष्टुं गतवन्तः। मार्गदर्शी वनपालकः वनजीविनां वनस्पतीनां च विषये निर्देशान् अदात्। पलास्तिकवस्तूनि वनेषु न निक्षिपेत्, अग्निं न ज्वालयेत्, शब्दकोलाहलान् न कुर्यादित्यादीन् विषयान् सः निरदिशत्। एतत् सर्वं मनसि निधाय वयं काननस्य अन्तः प्रविष्टाः।



अरण्यं विशालं सुन्दरं च भवति। वृक्षाणां पत्रनिकरोद्भवं मर्मरनादं, पक्षिणां कलकलारवं, वन्यमृगाणां विविधान् रवान् च श्रुत्वा वयम् अग्रे गताः। दूरे तृणावृतं समतलं, क्वचित् महावृक्षलतादिभिः परिपूरितं निबिडं काननं च दृष्ट्वा अन्तः प्राविशाम। तत्र विकसितपद्मैः शोभितं सरः, शुद्धजलपानाय समागताः हरिणाः, चित्राङ्किताः मीनाः, ध्याननिमग्नाः बकाः, फलिनः तथा चित्रसूनाः वृक्षाः च अस्माकं नयनानि अतोषयन्। कृष्णशिलोपमाः गजसमूहाः दूरे जलं पिबन्ति स्म। तथा शैलाः सूर्यकिरणैः पीतवर्णयुक्ताः भान्ति स्म। शिलाप्रदेशेषु वनकुसुमानि विलसन्ति स्म। रात्रौ नीलवर्णयुक्ताः पर्वताः मण्डलाकारेण स्थिताः बाला इव दृश्यन्ते स्म। दिवा तमसा आवृतम् इव, ज्योत्स्नया अलङ्कृतं रात्राविव दृष्टं तदरण्यम् अनुभूतिविशेषैः अस्माकं मनांसि अपूरयत्।

एवं काननस्य मनोहारिताम् आस्वाद्य प्रत्यागताः। तदनन्तरं तत्रत्यः वनपालकप्रमुखः वनसंरक्षणमधिकृत्य कक्ष्यामचालयत्। वृक्षाणां छेदनेन जीविनाम् आवासव्यवस्थायाः तथा वातावरणस्य च समावस्था नश्येत् इति सः अबोधयत्। तदनन्तरं वनसंरक्षणविषये चर्चा अपि आसीत्। तच्छ्रुत्वा अस्माकं गृहं परितः वृक्षरोपणाय वृक्षसंरक्षणाय च प्रेरणा समजनि। ततः आरभ्य अद्यापि काननश्रीः मम मनसि हर्षातिरेकं जनयति।



**पदच्छेदः**

| | | |
|---|---|---|
| वनमाश्रित्यैव | - | वनमाश्रित्य + एव |
| बाला इव | - | बालाः + इव |

ST-407-6-SANSKRIT-O/S-7

| | | |
|---|---|---|
| तच्छ्रुत्वा | - | तत्+ श्रुत्वा |
| रात्राविव | - | रात्रौ + इव |
| गृहेष्वपि | - | गृहेषु +अपि |
| कुर्यादित्यादि | - | कुर्यात् +इत्यादि |

## विग्रहः

| | | |
|---|---|---|
| वनपालकः | - | वनस्य पालकः। |
| काननश्रीः | - | काननस्य श्रीः। |
| मार्गदर्शी | - | मार्गं दर्शयति यः । |
| महावृक्षलताभिः | - | महान् च असौ वृक्षः च महावृक्षः, महावृक्षाः च, लताः च, ताभिः। |
| वनकुसुमानि | - | वने विद्यमानानि कुसुमानि। |

## पठनप्रवर्तनानि



**पाठभागस्य आशयं गणशः अवतारयतु।**

**श्रद्धेयाः अंशाः-**

अवतरणरीतिः

आशयव्यक्तता

समभावना।



**वनमहोत्सववेलायां सङ्घोष्ठिं कर्तुम् एकं करपत्रं / डिजिट्टल् करपत्रं निर्मातु।**

**श्रद्धेयाः अंशाः-**

आकर्षकता

वाक्यघटना

स्तरानुकूलता

**स्वकीयं यात्रानुभवमधिकृत्य मित्रं प्रति पत्रं लिखतु।**

**श्रद्धेयाः अंशाः-**

पत्रलेखनशैली
अवतरणरीतिः
आशयव्यक्तता

**वनसौन्दर्यमधिकृत्य अधोदत्तसूचकानि उपयुज्य नूतनकवितां रचयतु ।**

(सरोवर्णना , पर्वतवर्णना, मृगाणां वर्णना , पक्षिणां वर्णना)

**श्रद्धेयौ अंशौ -**

लेखनसामर्थ्यम्
आशयप्रस्तुतिः

**पाठभागे विद्यमानानि क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययानि उपयुज्य यथोचितं वाक्यं पूरयतु ।**

(श्रुत्वा, आस्वाद्य, द्रष्टुम्, आश्रित्य, विनश्य , संप्राप्य)

अहं चलच्चित्रं ......... चित्रशालां गच्छामि ।
प्रकृतिम् ........... जनाः जीवन्ति ।
प्रकृतेः सौन्दर्यम् ......... सर्वे सन्तुष्टाः भवन्ति ।
राधिका गीतं .......... नृत्यति ।
सन्देहं................जनाः प्रगतिं प्राप्नुवन्ति ।

**अमरकोशकारिकाः पठित्वा चित्रानुसारं पर्यायपदानि चित्वा पट्टिकां पूरयतु ।**

**वनम्** - अटव्यरण्यं विपिनं गहनं काननं वनम्
महारण्यमरण्यानी ।
अटवी – (ई.स्त्री. प्र. एकवचनम्) अरण्यम् , विपिनम् , गहनम् ,
काननम्, वनम् , महारण्यम् - (अ.न.प्र.एकवचनम्)
अरण्यानी - ( ई.स्त्री.प्र.एकवचनम्) ।

**सरः** - पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः।

पद्माकरः, तटाकः, कासारः – अ.पु.प्र.एकवचनम् ,

सरसी- ई.स्त्री.प्र.एकवचनम् , सरः- स.न.प्र.एकवचनम् ।



..............................................................
..............................................................
..............................................................
..............................................................



..............................................................
..............................................................
..............................................................
..............................................................

## अनुबन्धः

### निर् + दिश् अतिसर्जने प.प.लङ् लकारः

| | ए .व | द्वि . व | ब. व |
|---|---|---|---|
| प्र.पु | निरदिशत् | निरदिशताम् | निरदिशन् |
| म.पु | निरदिशः | निरदिशतम् | निरदिशत |
| उ.पु | निरदिशम् | निरदिशाव | निरदिशाम |

### ज्वल् दीप्तौ + णिच् प.प. विधि लिङ्

| | ए .व | द्वि . व | ब. व |
|---|---|---|---|
| प्र.पु | ज्वालयेत् | ज्वालयेताम् | ज्वालयेयुः |
| म.पु | ज्वालयेः | ज्वालयेतम् | ज्वालयेत |
| उ.पु | ज्वालयेयम् | ज्वालयेव | ज्वालयेम |

## अव्ययानि -

च - विद्यालये अध्यापकाः छात्राः च सन्ति ।

इव - सुन्दर्याः मुखं कमलम् इव शोभते ।

पुनः - सम्यक् पठतु इति पुनः पुनः माता वदति ।

### शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| काननम् | वनम् | വനം | Forest |
| द्रष्टुम् | दर्शनं कर्तुं | കാണുവാൻ | To see |
| तमसा | अन्धकारेण | ഇരുട്ട്കൊണ്ട് | By darkness |
| ज्योत्स्नया | कौमुद्या | നിലാവ്കൊണ്ട് | By moonlight |
| रवः | शब्दः | ശബ്ദം | Sound |
| तृणावृतम् | तृणैः संवृतम् | പുല്ലുകൾ കൊണ്ട് മൂടിയ | Coverd by grass |
| सरः | तटाकः | തടാകം | Lake |
| चित्राङ्किताः | विविधवर्णयुक्ताः | വർണ്ണപ്പകിട്ടാർന്ന | Colourful |
| चित्रसूनाः | विचित्रपुष्पाणि | പല വർണ്ണത്തിലുള്ള പൂക്കൾ | Colourful flowers |
| जगत् | विश्वम् | പ്രപഞ്ചം | Universe |
| कृष्णशिलाः | कृष्णवर्णयुक्ताः पाषाणखण्डाः | കറുത്ത പാറകൾ | Black stones |
| सूर्यकिरणैः | सूर्यरश्मिभिः | സൂര്യകിരണങ്ങളാൽ | By the rays of sun |
| छेदनेन | कर्तनेन | മുറിക്കുന്നത് കൊണ്ട് | By cutting |
| वृक्षरोपणम् | पादपरोपणम् | മരംനടീൽ | Tree plantation |
| प्रेरणा | प्रचोदनम् | പ്രചോദനം | Inspiration |

## अधिगताः अंशाः

- आशयः अवतारितः।
- करपत्रं निर्मितम् ।
- पत्रम् अलिखत्।
- नूतनकविताम् अरचयत्।
- वाक्यानि अलिखत्।
- पट्टिकाम् अकरोत्।

**वननशीकरणेन के के दोषाः भवेयुः इति विषये चर्चां कृत्वा टिप्पणीं लिखतु ।**

चर्चितानां विषयाणां क्रोडीकरणम्।

वननशीकरणेन प्रकृतिक्षोभाः भवन्ति । भक्ष्यविभवानाम् अपर्याप्तता भविष्यति। जीवजालानां मानवानामपि भक्ष्यदारिद्रयं भविष्यति।

**लोके प्रवृत्तानां दुरन्तानां वार्ताः, चित्राणि च सञ्चित्य चित्रसंपुटं निर्मातु ।**

तृतीयम् एककम्

# स्वास्थ्यं वै धनम्



राष्ट्रस्य सुस्थिरविकासाय अत्यन्तमावश्यकं भवति अन्नम् आरोग्यं च।

अद्य ते विधिवद् भुक्तमत्ति भोक्तारमन्यथा ।
आयुष्यं स्वास्थ्यदं पूर्वमन्यथैवेतरत् स्मृतम् ।।

इति वैद्यकीयं सुभाषितम् अन्नस्य आरोग्यस्य च प्राधान्यं बोधयति। एककेऽस्मिन् आरोग्यस्य व्यायामस्य च महत्त्वप्रतिपादकं पाठद्वयम् अन्तर्भवति। प्रथमः 'सुमनसः' इति नाटकं, द्वितीयः स्वास्थ्यप्रतिपादकानि कानिचन सुभाषितानि च ।

# पञ्चमः पाठः

# सुमनसः

संस्कृतोत्सवे कति स्पर्धाः सन्ति?
ताः काः?
भवन्तः नाटकं दृष्टवन्तः वा?



## आमुखम्

काव्यं दृश्यं श्रव्यं चेति द्विविधं भवति। काव्येषु नाटकं रम्यम् इति प्रसिद्धा उक्तिः अस्ति। नाटकं सर्वेषां मनसि सन्तोषं जनयति।

# प्रथमः अङ्कः

(सूत्रधारः प्रविश्य इतस्ततः चलति। ततः रङ्गमध्ये स्थित्वा सामाजिकानवलोक्य मङ्गलश्लोकमालपति)

अन्नं प्राणाः बलं चान्नम्
अन्नं सर्वार्थसाधनम्।
पशुपक्षिमनुष्याणा-
मन्नमेवोपजीवनम् ।।

अन्नमेव सर्वम् ... सर्वे अन्नार्थमटन्ति... (हस्तं प्रसार्य) पश्य पश्य

(सूत्रधारः निष्क्रान्तः)

(रङ्गमञ्चे भोजनशाला। भोजनशालायाः पुरतः एका दीर्घपीठिका)

(दीर्घपीठिकायां कश्चन बालकः उपविशति, कश्चन पुरुषः भोजनशालाम् आयाति)



ST-407-7-SANSKRIT-O/S-7

बालकः - (दीनदीनम्) ज्येष्ठ...! भोक्तुं किमपि...

पुरुषः - (ईर्ष्यया झटिति) न न... अपसर....अपसर...

(पुरुषः भोजनशालां प्रविशति।)

बालकः - (इतस्ततः भ्रमणं कृत्वा विषादभावेन आत्मगतम्) माता कनिष्ठा सोदरी च ह्यः आरभ्य किमपि न अखादताम्.... अहमपि। (प्रकाशं) रिक्तहस्तः एव अद्यापि गृहं गच्छामि।

(सः गच्छति। युवा युवती च रङ्गं प्रविशतः। अपरपार्श्वे उच्चैः शब्दः रोदनं च श्रूयते। धावन्तौ युवानौ बालकम् आदाय दीर्घपीठिकायाम् शाययतः)

युवती - श्रान्तः दृश्यते। (युवानं प्रति) जलमानय। शीघ्रं गच्छ...

(युवा धावन् जलमानयति। आनीतं जलं युवती बालकस्य मुखे क्षिपति... उन्मीलितनेत्रः बालकः रोदिति)

युवती - (समाश्वास्य) वत्स... जलं पिब... (युवानं प्रति) दृष्ट्वा श्रान्तः इव दृश्यते।

युवा - किमपि न भुक्तवान् वा...?

बालकः - न... न...

युवती - (युवानं प्रति) भोजनाय किमपि आनयतु।

बालकः - (दैन्येन) न... न... गृहे माता कनिष्ठा सोदरी च वर्तेते।

युवा - तव गृहं कुत्र?

बालकः - अत्रैव... पार्श्वे।

युवती - किमपि भोज्यं क्रीत्वा गृहं नयावः।

(सर्वे गच्छन्ति)

# द्वितीयः अङ्कः

(जीर्णस्य गृहस्य चित्रं, माता शेते। कनिष्ठा सोदरी मार्जयति। बालकेन सह युवानौ आयातः।
(कनिष्ठा तान् दृष्ट्वा मातरं प्रति)

बालिका - अम्ब ! भ्रात्रा साकं केचन आयान्ति।

(भोज्यमादाय युवानौ श्रान्तेन बालकेन साकं प्रविशतः।)

माता - (श्रान्तं पुत्रं दृष्ट्वा ससम्भ्रमम्) पुत्र !

युवती - मातः! किमपि न। (बालकं प्रति) वत्स ! मातुः किमभवत् ..?

बालकः - माता उदररोगेण पीडिता। असह्या वेदना च। तस्याः परिचरणाय सोदरी अपि गृहे एव तिष्ठति।

युवती - (बालिकां प्रति) कस्यां कक्ष्यायां पठसि?

बालिका - तृतीयकक्ष्यायाम्।

अम्बा - (सगद्गदम्) अधुना सा विद्यालयं गन्तुं न शक्नोति।

(युवानौ रहसि संभाषणं कुरुतः।)






# तृतीयः अङ्कः

(विद्यालयस्य अङ्कणम्, अध्यापिका बालिका च तिष्ठति।)

अध्यापिका - प्रियंवदे ! कः विशेषः? माता कुशलिनी वा?

बालिका - (सन्तोषेण) आम्। तयोः युवकयोः साहाय्येन माता रोगात् मुक्ता... अधुना समीपगृहेषु परिचर्याकर्म करोति।

अध्यापिका - भवतु। तव ज्येष्ठः किं करोति?

बालिका - समीपस्थे उच्चविद्यालये पठनम् अनुवर्तते।

अध्यापिका - वत्से ! तव प्रसन्नेन मुखेन अहमपि तुष्टा जाता।

(निश्चलं रङ्गमञ्चम्, सूत्रधारः प्रविशति।)

सूत्रधारः - अस्य परिवारस्य दुःस्थितिं निवारयितुं तौ समर्थौ अभवताम्। नाटकमिदमेकं सूचकं भवति। इत्थम् अस्मान् परितः विद्यमानानां जनानां कष्टतां दारिद्र्यं च अवगम्य तन्निवारयितुं वयमपि प्रयतामहे।

(सर्वे रङ्गमञ्चमायान्ति।)

भरतवाक्यम्...

समाना मानवास्सर्वे भिन्नाश्चानुभवास्तथा।
साह्यं परस्परं कृत्वा सर्वे तुष्टिमवाप्नुयुः ॥

(सर्वे निष्क्रान्ताः)

## पदच्छेदः

तन्निवारयितुम् - तत् + निवारयितुम्।
इतस्ततः - इतः + ततः।
मानवास्सर्वे - मानवाः + सर्वे ।

## विग्रहः

युवानौ - युवती च युवा च।
विषादभावः - विषादस्य भावः।
असह्या - सोढुं शक्या सह्या, न सह्या असह्या।

## अमरकोशः

युवती - कन्याकुमारीगौरी तु नग्निकाऽनागतार्तवा ।
स्यान्मध्यमा दृष्टरजास्तरुणी युवतिस्समे ।।

कन्या कुमारी (कन्या)
गौरी, नग्निका, अनागतार्तवा (अदृष्टरजसा)
मध्यमा (दृष्टरजसा)
तरुणी, युवती (युवति)

जननी - जनयित्री प्रसूर्माता जननी।
जनयित्री जननी (ई.स्त्री.प्र.ए.) प्रसूः (ऊ.स्त्री.प्र.ए.) माता (ऋ.स्त्री.प्र.ए.)

पुत्रः - आत्मजस्तनयः सूनुः सुतः पुत्रः।

आत्मजः (अ.पु) तनयः (अ.पु) सूनुः (उ.पु) सुतः (अ.पु) पुत्रः (अ.पु)

## पठनप्रवर्तनानि

**नाटकं सम्यक् पठित्वा तस्य आशयं कथारूपेण लिखतु।**

**श्रद्धेयाः अंशाः -**

उचितशीर्षकम्
आशयाविष्कारः
उचितभाषाप्रयोगः
कथाकथनशैली

उदा - कश्चन बालकः भोजनशालायाः समीपे दीर्घपीठिकायां उपविशति स्म।
स: श्रान्तः आसीत्। ..........

**चित्राणि दृष्ट्वा तान्यधिकृत्य संभाषणं लिखतु।**

**श्रद्धेयौ अंशौ -**

उचितः भाषाप्रयोगः
आशयव्यक्तता







## उदाहरणानुसारं नूतनविज्ञापनपत्रं रचयतु।

**श्रद्धेयौ अंशौ** - भाषाशैली
आशयव्यक्तता
घटना

उदा-

प्रियसामाजिकाः

अस्माकं विद्यालये जनुवरीमासस्य २३ दिनाङ्के सायं ४ वादने एकस्य लघुनाटकस्य प्रदर्शनं भविष्यति। सर्वेभ्यो हार्दं स्वागतम्।

नाटकस्य नाम

**' सुमनसः'**

स्थानम् .........
दिनाङ्कः ...........

हस्ताक्षरम्
कार्यदर्शी, संस्कृतसभा

१.गणतन्त्रदिनाघोषः।
२.परितस्थितिदिनाचरणम्।
३.वार्षिकदिनाचरणम्।

## उदाहरणानुसारं लृट्लकारस्य परिवर्तनं करोतु।

श्रद्धेयौ अंशौ - लकाराणां ज्ञानम् , उचितलेखनम् ।

| लट् | लङ् | लृट् |
|---|---|---|
| पठति | अपठत् | पठिष्यति |
| खादति | ............ | खादिष्यति |
| भवति | अभवत् | ............ |
| गच्छति | ............ | गमिष्यति |
| करोति | अकरोत् | ............ |

### 'अस्मद्' शब्दस्य उचितानि रूपाणि उपयुज्य वाक्यलेखनं करोतु।

**श्रद्धेयौ अंशौ**

'अस्मद्' शब्दस्य ज्ञानम्
उचितवाक्यलेखनम्।

उदा - अहं बालकः भवामि।

१. मम गृहं कालटिदेशे अस्ति।

२. ..............................

३. ..............................

४. ..............................

### मञ्जूषातः उचितपदं स्वीकृत्य यथोचितं पूरयतु।

(जननी, मध्या, कन्या, प्रसूः, तरुणी, कुमारी)




## अनुबन्धः

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| अन्नम् | आहारः | ഭക്ഷണം | food |
| भोजनशाला | आहारशाला | ഭക്ഷണശാല | hotel |
| कनिष्ठा | अनुजा | ഇളയസഹോദരി | younger sister |

| | | | |
|---|---|---|---|
| उच्चैः | उच्चस्वरैः | ഉച്ചത്തിൽ | loudly |
| रोदनम् | क्रन्दनम् | കരച്ചിൽ | cry (n) |
| क्षीणः | श्रान्तः | ക്ഷീണിച്ചവൻ | tired |
| शीघ्रम् | सहसा | പെട്ടെന്ന് | suddenly |
| आनयति | आवहति | കൊണ്ടുവരുന്നു | brings |
| अधुना | इदानीम् | ഇപ്പോൾ | now |
| अङ्कणम् | चत्वरम् | മുറ്റം | yard |
| अनुवर्तते | अनुगच्छति | പിന്തുടരുന്നു | Follows |
| तुष्टिः | सन्तोषम् | സന്തോഷം | happiness |

१. ICT साहाय्येन समीकृताहारस्य भित्तिपत्रिकां निर्मातु।
२. आरोग्यसंरक्षणमधिकृत्य फलकं निर्मातु।
३. विविधजीवितावस्थानां चित्रं सञ्चित्य सम्पुटं रचयतु।(मासिक्याः दिनपत्रिकायाश्च।)

## अधिगताः अंशाः

- नाटकं कथारूपेण परिवर्त्य अलिखत्।
- चित्रमधिकृत्य संभाषणम् अलिखत्।
- विज्ञापनपत्रस्य निर्माणम् अकरोत्।
- लकाराणां परिवर्तनाभ्यासम् अकरोत्।
- वाक्यलेखनम् अकरोत्।
- यथोचितं अपूरयत् ।

शरीरायासजननम्
कर्म व्यायामसंज्ञितम्।
तत्कृत्वा तु सुखं देहम्
विमृद्नीयात् समन्ततः।।

ST-407-8-SANSKRIT-O/S-7

## षष्ठः पाठः

# स्वास्थ्यमस्तु

प्रियच्छात्राः ! दारिद्र्यम् इति आशयम् अधिकृत्य नाटकं पठितवन्तः। स्वास्थ्यसंरक्षणे पोषकाहारः व्यायामः च आवश्यकः भवति। एतस्मात् पाठभागात् आरोग्यं व्यायामं च अधिकृत्य कानिचन सुभाषितानि पठामः।

### आमुखम्

क्रिस्तोः पूर्वं षष्ठे शताब्दे भारतदेशे सुश्रुतः नाम आचार्यः जीवति स्म। शस्त्रक्रियायाः उपज्ञाता इति प्रथितो भवति अयं महानुभावः। वैद्यशास्त्रे प्रसिद्धा सुश्रुतसंहिता अनेन विरचिता । सुश्रुतसंहितायाः कांश्चन श्लोकान् पठामः।



१ श्रमक्लमपिपासोष्ण-
शीतादीनां सहिष्णुता।
आरोग्यं चापि परमं
व्यायामादुपजायते।।



**पदच्छेदः**

| | | |
|---|---|---|
| चापि | - | च + अपि। |
| व्यायामादुपजायते | - | व्यायामात् + उपजायते। |

| **अन्वयः** | **अर्थः** |
|---|---|
| व्यायामात् | अभ्यासात्/अनुशीलनात् |
| श्रमक्लमपिपासोष्णशीतादीनां | प्रयत्नश्रान्तेः पिपासायाः तापस्य शैत्यादीनां च। |
| सहिष्णुता | सहनशक्तिः (क्षमता) |
| परमम् | श्रेष्ठम् |
| आरोग्यम् अपि | स्वास्थ्यम् अपि |
| उपजायते | सञ्जायते। |

## आशयः

व्यायामात् प्रयत्नोत्पन्नश्रान्तेः पिपासायाः तापस्य शैत्यादीनां सहनक्षमता नीरोगता च लभते।

## क्रियापदानि

उपजायते - उप +जनि प्रादुर्भावे इति धातुः आत्मनेपदी लट् प्र.पु.ए.व.।

## अमरकोशः

शीतम् - शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः।
शीतम् (अ.नपु. ), सुषीमः,शिशिरः,
जडः , तुषारः, शीतलः, हिमः(अ.पु.)।

उष्णम् - निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः।
निदाघः, उष्णः, ऊष्मागमः, तपः (अ.पु.)।

२. शरीरोपचयः कान्ति-
गात्राणां सुविभक्तता।
दीप्ताग्नित्वमनालस्यं
स्थिरत्वं लाघवं मृजा।।



## पदच्छेदः

कान्तिर्गात्राणाम् - कान्तिः + गात्राणाम्।
दीप्ताग्नित्वमनालस्यम् - दीप्ताग्नित्वम् +अनालस्यम्।

| अन्वयः | अर्थः |
|---|---|
| शरीरोपचयः | गात्रस्य अभिवृद्धिः |
| कान्तिः | आभा/ शोभा |
| गात्राणाम् | शरीराणाम् |
| सुविभक्तता | सुघटितत्वम् |
| दीप्ताग्नित्वम् | जठराग्नेः प्रवर्धकत्वम् |
| अनालस्यम् | आलस्यहीनत्वम् |
| स्थिरत्वम् | स्थिरता |
| लाघवम् | लघुत्वम् |
| मृजा | निर्मलीकरणम् |
| (च व्यायामादुपजायते) | च व्यायामेन प्राप्नोति। |

### आशयः

व्यायामात् शरीरकान्तिः वर्धते। समतुलिता शरीरघटना जायते। जठराग्नेः प्रवर्धनेन भुक्तमन्नं यथोचितं जीर्यते। शरीरस्य दृढत्वं लाघवत्वं स्वच्छता च जायते।

### विग्रहः

शरीरोपचयः - शरीरस्य उपचयः।

### अमरकोशः

शरीरम् - गात्रं वपुस्संहननं शरीरं वर्ष्म विग्रहः
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः।
गात्रं, संहननं, शरीरं, (अ.न.प्र.ए.व.) वपुः (स.न.प्र.ए.व.)
वर्ष्म (न.न.प्र.ए.व.) विग्रहः, कायः, देहः (पुल्लिङ्गे नपुंसकलिङ्गे च)
मूर्तिः (इ.स्त्री.प्र.ए.व.) तनुः (उ.स्त्री.प्र.ए.व.) तनूः (ऊ.स्त्री.प्र.ए.व.)।

३. न चैनं सहसाऽऽक्रम्य
जरा समधिरोहति।
स्थिरीभवति मांसं च
व्यायामाभिरतस्य च।।



### पदच्छेदः

चैनम् - च + एनम्।
सहसाऽऽक्रम्य - सहसा + आक्रम्य।

| अन्वयः | अर्थः |
| --- | --- |
| व्यायामाभिरतस्य | प्रतिदिनं व्यायामं कुर्वतः |
| मांसम् | मांसपेशिः (शरीरम्) |
| स्थिरीभवति | दृढं भवति। |
| जरा | त्वचः जर्जरितत्वम् (वार्धक्यम्) |

| | |
|---|---|
| एनम् | एतं जनम् |
| सहसा | शीघ्रम् |
| आक्रम्य | आक्रमणं कृत्वा |
| न समधिरोहति | न प्राप्नोति । |

**आशयः**

प्रतिदिनं व्यायामं कुर्वतः जनस्य शरीरं दृढं भवति। तादृशं जनं जरा सहसा न बाधते। ( अतः प्रतिदिनं व्यायामं कुर्यात्।)

**विग्रहः**

व्यायामाभिरतस्य - व्यायामे अभिरतः व्यायामाभिरतः, तस्य।

**क्रियापदम्**

समधिरोहति - सम्+ अधि+ रुह् रोहणे इति धातुः परस्मैपदी लट् प्र.पु ए.व।

४. वयोबलशरीराणि
देशकालाशनानि च ।
समीक्ष्य कुर्याद् व्यायाम-
मन्यथा रोगमाप्नुयात् ।।



**पदच्छेदः**

व्यायाममन्यथा - व्यायामम्+ अन्यथा।

रोगमाप्नुयात् - रोगम्+आप्नुयात्।

| **अन्वयः** | **अर्थः** |
|---|---|
| वयोबलशरीराणि | आयुः शक्तिः देहः च |
| देशकालाशनानि | स्थानं समयं भोजनानि च |
| समीक्ष्य | परीक्ष्य |

| | |
|---|---|
| व्यायामम् | परिश्रमम् |
| कुर्यात् | आचरेत् |
| अन्यथा | नो चेत् |
| रोगम् | रुक् |
| आप्नुयात् | प्राप्नुयात्। |

## आशयः

आयुः, शक्तिं, देहं, देशं, कालं, भोजनं च अनुसृत्य व्यायामः करणीयः। नो चेत् रोगं प्राप्नुयात् (रुग्णः भवेत्) ।

## विग्रहः

वयोबलशरीराणि - वयः च बलं च शरीरं च वयोबलशरीराणि।

देशकालाशनानि - देशः च कालः च अशनं च देशकालाशनानि।

## पठनप्रवर्तनानि



**सुभाषितानि सतालम् आलपतु।**

**श्रद्धेयाः अंशाः**

अक्षरस्फुटता।
उचितः तालः।
आशयावबोधः।



**सूचनानुसारम् अन्वयं वदतु लिखतु।**

उदा - श्रमक्लमपिपासोष्ण-
शीतादीनां सहिष्णुता।
आरोग्यं चापि परमं
व्यायामादुपजायते।।

**सूचनाः-**

श्लोके क्रियापदं किम् ? उपजायते।
कस्माद् उपजायते ? व्यायामात्।

व्यायामात् किम् उपजायते ? श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता उपजायते।
पुनः किम् उपजायते ?
परमम् आरोग्यम् अपि व्यायामात् उपजायते।

**श्रद्धेयाः अंशाः**

आशयावबोधः।
अन्वयक्रमः।
उचितपदविन्यासपटुता।

**व्यायामम् अधिकृत्य चर्चां कृत्वा लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

भागभागित्वम्।
संभाषणयुक्तिः।
आशयक्रमीकरणम्।

**अधोदत्ताशयप्रतिपादकानि सुभाषितानि सञ्चित्य सम्पुटं निर्मातु।**
(व्यायामः, आरोग्यम्, भक्षणम्)

**श्रद्धेयाः अंशाः**

आशयव्यक्तता।
वाक्यघटना।
अवतरणशैली।

**अधोदत्तवाक्यानि उचितेन चित्रेण सह रेखया योजयतु।**

समीकृताहारः स्वास्थ्यसंवर्धनाय।

क्रीडा गात्रसौख्याय।

योगः मनःस्वास्थ्याय।







**श्रद्धेयौ अंशौ**

आशयावगमनम्।
उचितरीत्या योजनम्।

**व्यायाममधिकृत्य भित्तिपत्रिकां निर्मातु।**

**श्रद्धेयाः अंशाः**

आशयव्यक्तता।
भाषाप्रयोगः।
आकर्षकत्वम्।

**उदाहरणानुसारं कोष्ठकात् समानार्थकपदानि चित्वा वर्गीकरोतु।**

**(गुणः, निदाघः, देहः ,गात्रम्, तनुः, सुषीमः, ऊष्मागमः, कायः, उष्णः, तपः, तुषारः, जडः )**




ST-407-9-SANSKRIT-O/S-7

## अनुबन्धः

### विग्रहः

**श्रमक्लमपिपासोष्णशीतादीनाम्** - श्रमश्च क्लमश्च पिपासा च उष्णं च शीतं च श्रमक्लमपिपासोष्णशीतानि, तानि आदिः येषां ते श्रमक्लमपिपासोष्णशीतादीनि, तेषां श्रमक्लमपिपासोष्णशीतादीनाम्।

### क्रियापदम्

आप्नुयात् - आप्लृ लम्भने इति धातुः परस्मैपदी विधिलिङ् प्र.पु ए .व.।
कुर्यात् - डुकृञ् करणे इति धातुः परस्मैपदी विधिलिङ् प्र.पु.ए .व.।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| अन्यथा | नो चेत् | മറിച്ചായാൽ | Otherwise |
| आरोग्यम् | स्वास्थ्यम् | ആരോഗ്യം | Health |
| आप्नुयात् | प्राप्नुयात् | പ്രാപിച്ചാലും | May be achieved |
| उपजायते | सञ्जायते | ഉണ്ടാകുന്നു | Takes birth |
| कान्तिः | आभा | ശോഭ | Beauty |
| गात्रम् | शरीरम् | ശരീരം | Phisique |
| दीप्ताग्नित्वम् | जठराग्नेः प्रवर्धकत्वम् | ദഹനാഗ്നിയെ വർദ്ധിപ്പിക്കുന്ന | Encymes |
| परमम् | श्रेष्ठम् | ശ്രേഷ്ഠം | Great |
| मृजा | स्वच्छीकरणम् | ശുദ്ധീകരണം | Purification |
| समीक्ष्य | परीक्ष्य | പരീക്ഷിച്ചിട്ട് | Having examined |
| सहसा | शीघ्रम् | പെട്ടെന്ന് | Quickly |
| सहिष्णुता | सहनशीलम् | സഹനശക്തി | Tolerance |
| सुविभक्तता | सुघटितत्वम् | നല്ല ഘടനയുള്ളത് | Perfect structure |
| स्थिरीभवति | दृढीभवति | ഉറയ്ക്കുന്നു | Becomes fit |

## अधिगताः अंशाः

- सुभाषितानि आलपत्।
- सूचनानुसारम् अन्वयम् अलिखत्।
- व्यायामम् अधिकृत्य लघुटिप्पणीम् अलिखित्।
- सुभाषितसम्पुटम् अकरोत्।
- वाक्यानि चित्रेण सह अयोजयत्।
- व्यायाममधिकृत्य भित्तिपत्रिकाम् अकरोत्।
- समानार्थकपदानि वर्गीकृत्य अलिखत्।

### ബാലപ്രബോധനം

വെള്ളം ജടാന്തേ ബിഭ്രാണം
വെള്ളിമാമലവിഗ്രഹം
വെള്ളൂരമർന്ന ഗൗരീശ-
മുള്ളിലമ്പൊടു ചിന്തയേ! (1)

കർത്തൃകർമ്മക്രിയാഭേദം
വിഭക്ത്യർത്ഥാന്തരങ്ങളും
ഭാഷയായിഹ ചൊല്ലുന്നേൻ
ബാലാന്മാരറിവാനഹം (2)

ശബ്ദം രണ്ടുവിധം പ്രോക്തം
തിങന്തഞ്ച സുബന്തവും
രണ്ടു ജാതി സുബന്തേ ചാപ്യ-
ജന്തഞ്ച ഹലന്തവും. (3)

ലിംഗം മുമ്മൂന്നു രണ്ടിന്നും
വരും പുല്ലിംഗമാദിയിൽ
സ്ത്രീലിംഗം മദ്ധ്യഭാഗേ സ്യാ
ദൊടുക്കത്തു നപുംസകം. (4)

പ്രഥമാ ച ദ്വിതീയാ ച
തൃതീയാ ച ചതുർത്ഥ്യപി
പഞ്ചമീ ഷഷ്ഠിയും സപ്തമ്യേ
വമേഴു വിഭക്തികൾ (8)

ഇവറ്റിന്നിഹ വെവ്വേറെ
മുമ്മൂന്നു വചനം വരും
ഏകദ്വിബഹുമുമ്പായി
വചനം മൂന്നിഹ ക്രമാൽ (9)

ഒരുത്തനിരുവർ പിന്നെ-
പ്പലരെന്നർത്ഥമായ് വരും.
പ്രഥമായാ ഭേദമത്രേ
മുറ്റും സംബോധനാഭിധാ (10)

അതെന്നു പ്രഥമയ്ക്കർത്ഥം
ദ്വിതീയയ്ക്കതിനെപ്പുനഃ
അതിനോടതിലേക്കെന്നും
ദ്വിതീയയ്ക്കർത്ഥമായ് വരും (11)

തൃതീയ ഹേതുവായിട്ടു
കൊണ്ടാലോടുടെയെന്നപി
ആയിക്കൊണ്ടു ചതുർത്ഥീ ച
സർവ്വത്ര പരികീർത്തിതാ (12)

അതിങ്കൽനിന്നുപോകെക്കാൾ
ഹേതുവായിട്ടു പഞ്ചമി.
ഇക്കുമിന്നുമുടെ ഷഷ്ഠിയ്ക്കു
തിന്റെ വെച്ചുമെന്നപി (13)

അതിങ്കലതിൽവെച്ചെന്നും
വിഷയം സപ്തമീ മതാ.
വിഭക്ത്യർത്ഥങ്ങളീവണ്ണം
ചൊല്ലുന്നൂ പലജാതിയും (14)

വൃക്ഷസ്തിഷ്ഠത്യസൗ,വൃക്ഷം
നിൽക്കുന്നു; വൃക്ഷമാശ്രയേ,
വൃക്ഷത്തെയാശ്രയിക്കുന്നേൻ;
വൃക്ഷേണ ദ്വിരദോ ഹതഃ, (15)

വൃക്ഷത്താലാന കൊല്ലപ്പെട്ടെ
ന്നീവണ്ണം തൃതീയയും;
നമശ്ചകാര വൃക്ഷായ
ശാഖാ സംരുദ്ധ ഭാസ്വതേ, (16)

നമസ്കരിച്ചേൻ വൃക്ഷത്തിന്നാ,
യിക്കൊണ്ട് ചതുർത്ഥ്യപി;
വൃക്ഷാഗ്രാത് കുസുമം ഭ്രഷ്ടം,
വൃക്ഷാഗ്രത്തിങ്കൽ നിന്നഥ (17)

പൂ വീണെന്നഥ വൃക്ഷസ്യ
ശാഖാ ചാത്യന്തമുന്നതാ,
വൃക്ഷത്തിന്റെ കൊമ്പുമേറ്റ
മുയർന്നെന്നതു ഷഷ്ഠ്യപി;(18)

പക്ഷി വൃക്ഷേസ്ഥിതഃ, പക്ഷി
വൃക്ഷത്തിങ്കലിരുന്നിതു;
ഹേ വൃക്ഷ, ത്വം കമ്പസേ,
കിമിതി സംബോധനാപി ച (19)

എടോ വൃക്ഷം നീ ചലിക്കുന്ന
തെന്തീ വണ്ണമൊക്കവേ,
സംബോധനാ നിർണ്ണയാർത്ഥം
ഹേ ശബ്ദം കൂടെയുച്യതേ (20)

ലട്ടും ലങ്ങും ലോട്ടും ലിങ്ങും
ലിട്ടും ലുങ്ങും തഥൈവ ച
ലൃട്ടും ലൃങ്ങും ലുട്ടും ലേട്ടും
ലകാരം പത്തിവ ക്രമാൽ. (40)

ആശീർലിങ്ങ് ലിങ്ങിലേ ഭേദം
കാലഭേദമഥോച്യതേ
ലട്ടിയക്കത്തിൽ വന്നീടും
ലങ്ങ് ലുങ്ങ് ലിട്ടുകൾ പോയതിൽ (41)

ചെയ്ക പോക വരുതാക
എന്നിത്യാദിഷു ലിങ്ങ് ലോട്
ലൃങ്ങ് ലൃട്യേ ലുട്ടു മൂന്നും
മേൽവരുന്നുള്ളവയിൽ ക്രമാൽ. (42)

നാനാധാതുഗണത്തിന്റെ
മേൽവരുന്നു ലഡാദയഃ
ഭൂസത്തായാമേധവൃദ്ധൗ
ഡുപചഷ്പാക ഏവ ച (43)

ലകാരത്തിന്നു രൂപങ്ങൾ
ഈരണ്ടാം ധാതുഭേദതഃ
പരസ്മൈപദവും പിന്നെ
ആത്മനേപദവും തഥാ (44)

ഓരോന്നാകിലുമാം പിന്നെ
ചിലേടത്തു യഥാവിധി
ഓരോന്നിഹ വെവ്വേറെ
വർഗ്ഗം മുമ്മൂന്നു വന്നിടും. (45)

പ്രഥമഃ പുരുഷഃ പൂർവ്വം
മധ്യമഃ പുരുഷഃ പുനഃ
ഉത്തമഃ പുരുഷശ്ചേതി
വർഗ്ഗം മൂന്നിവ രണ്ടിലും (46)

ഓരോന്നിന്നിഹ വെവ്വേറെ
മുമ്മൂന്നു വചനം വരും
ഏകദ്വിബഹുമുമ്പായി
വചനം മൂന്നിവ ക്രമാൽ (47)

മദ്ധ്യമൻ വരുമേടത്ത്
യുഷ്മത്തുകൾ വരും ക്രമാൽ
ഉത്തമൻ വരുമേടത്തങ്ങ-
സ്മത്തുകൾ വരുന്നിതു (48)

മറ്റുള്ളേടത്തു പ്രഥമ
പുരുഷൻ വരുമെപ്പോഴും
സഃ കരോതി, ത്വം കരോഷി,
കരോമ്യഹമിതി ക്രമാൽ. (49)

അവൻ ചെയ്യുന്നു, നീ ചെയ്യുന്നു,
ഞാൻ ചെയ്യുന്നു ഇതി ക്രമാൽ.
കുർവ്വന്തി തേ, തൗ കുരുതഃ
സഃ കരോതി യഥാക്രമം (50)

തന്റെ തന്റെ സമത്തോടു
കൂടുമത്രേ വിഭക്തികൾ
വചനങ്ങളുമവ്വണ്ണം
തഥാ ലിംഗങ്ങളും വരും (51)

കൃഷ്ണഃ കമലപത്രാക്ഷഃ
കൃഷ്ണം കമലലോചനം,
കൃഷ്ണേന വാസുദേവേന,
കൃഷ്ണായ പരമാത്മനേ, (52)

കൃഷ്ണാൽ കമലപത്രാക്ഷാൽ,
കൃഷ്ണസ്യ കമലാപതേഃ,
കൃഷ്ണേ കമലപത്രാക്ഷേ,
ഹേ കൃഷ്ണ പുരുഷോത്തമ! (53)

കൃഷ്ണഃ കമലപത്രാക്ഷഃ,
കൃഷ്ണൗ കമലലോചനൗ,
കൃഷ്ണാഃ കമലപത്രാക്ഷാഃ
വചനങ്ങളിവണ്ണമാം. (54)

വൃക്ഷഃ കുസുമിതഃ ,കാന്താ
പൂർണ്ണചന്ദ്രനിഭാനനാ
വനം കുസുമിതം ഭാതി,
ലിംഗഭേദങ്ങളിങ്ങനെ. (55)

# अक्षरमाला

## स्वराक्षराणि

| | | | | |
|---|---|---|---|---|
| अ | आ | इ | ई | उ |
| ऊ | ऋ | ॠ | ऌ | ए |
| ऐ | ओ | औ | अं | अः |

## व्यञ्जनाक्षराणि

| | | | | |
|---|---|---|---|---|
| क | ख | ग | घ | ङ |
| च | छ | ज | झ | ञ |
| ट | ठ | ड | ढ | ण |
| त | थ | द | ध | न |
| प | फ | ब | भ | म |
| य | र | ल | व | |
| श | ष | स | ह | |

# ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക, സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും, ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹികനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മീഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണ്ണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപൽക്കരമായ ജോലികളിൽനിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽനിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.


*ബന്ധപ്പെടേണ്ട വിലാസം:*

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**

ശ്രീ ഗണേഷ്, റ്റി.സി. 14/2036, വാൻറോസ് ജംങ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം – 34
ഫോൺ 0471 – 2326603
ഇ- മെയിൽ childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ് : www.kescpcr.kerala.gov.in


ചൈൽഡ് ഹെൽപ്പ് ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ – 1800 425 1400
കേരള പൊലീസ് ഹെൽപ്പ് ലൈൻ - 0471 – 3243000/44000/45000

*online **R.T.E Monitoring : www.nireekshana.org.in***